श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ ऊर्ध्वपुण्ड्रध्यानश्लोकाः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ ऊर्ध्वपुण्ड्रध्यानश्लोकाः ॥

ललाटे सततं देव्या श्रिया सह विराजितम्।
चतुश्चक्रं नमस्यामि केशवं कनकप्रभम्॥ 1 ॥

अमृतोद्भवया देव्या समाश्लिष्टम् अथोदरे।
नारायणं घनश्यामं चतुश्शङ्खं नमाम्यहम्॥ 2 ॥

नित्यं कमलयाश्लिष्टं हृदये करुणाम्बुधिम्।
माधवं मणिभङ्गाभं चिन्तयामि चतुर्गदम्॥ 3 ॥

देव्या च चन्द्रशोभिन्या मम कण्ठे विराजितम्।
चन्द्रभासं चतुश्शार्ङ्गं गोविन्दम् अभिसंश्रये॥ 4 ॥

विष्णुपत्न्याख्यया देव्या कुक्षौ दक्षिणपार्श्वगम्।
विष्णुं चतुर्हलं वन्दे पद्मकिञ्जल्कसन्निभम्॥ 5 ॥

वैष्णवीसञ्ज्ञया देव्या कलितं दक्षिणे भुजे।
चतुर्मुसलम् अब्जाभं संश्रये मधुसूदनम्॥ 6 ॥

कण्ठस्य दक्षिणे पार्श्वे वरारोहाधिपं प्रभुम्।
अग्निवर्णं चतुःखड्गं भावयामि त्रिविक्रमम्॥ 7 ॥

हरिवल्लभया देव्या वामकुक्षौ स्थितं हरिम्।
वामनं बालसूर्याभं चतुर्वज्रं विभावये॥ 8 ॥

वामबाहौ महाबाहुं शार्ङ्गिण्याः पतिमव्ययम्।
श्रीधरं पुण्डरीकाभं चतुःपट्टं समाश्रये॥ 9 ॥

देवदेविकया देव्या वामकण्ठे विभासितम्।
चतुर्मुद्गरम् अभ्येमि हृषीकेशं तटित्प्रभम्॥ **10** ॥

कटिमध्यगया देव्या महालक्ष्म्या विराजितम्।
पञ्चायुधं पद्मनाभं प्रणमाम्यर्करोचिषम्॥ **11** ॥

काकुदे सुरसुन्दर्याः पतिमद्भुतरूपिणम्।
दामोदरं चतुःपाशं इन्द्रकोपनिभं भजे॥ **12** ॥

सर्वेषामखिलाभीष्ट फलदाश्लिष्टविग्रहम्।
वासुदेवमुपासेऽहं पूर्णेन्द्वयुतसन्निभम्॥ **13** ॥

॥ ऊर्ध्वपुण्ड्रध्यानश्लोकाः समाप्ताः॥